M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. /
Ser. 1278

Title: Chintamani

1278

InComplete

C

	Chintamani		Title
			Author
			Editor
S/C			Year, Vols.
			Publisher
1278		Pages. 5, 6-8	Remarks

त्वावच्छिन्नप्रतियोगितासंबंधेनघटस्याभावेनतादृशप्रतियोगितायाअलीकत्वादितिवाच्यं कंबुग्रीवादिमत्वाव
च्छिन्नत्वप्रतियोगितानामेवसंबंधतयाभानात् अभावस्यघटत्वावच्छिन्नप्रतियोगित्वमेवघटसंबंधितयाकंबुग्रीवा
दिमत्वावच्छिन्नप्रतियोगितासंबंधेनघटसंबंधित्वेनतेनसंबंधेनान्वियद्वृत्ति घटप्रकारकत्वादिति भूतलेघटपटौन
स्तइत्यत्रभूतलभूतलभूतलवृत्त्यभावेघटपटयोरुभयत्वावच्छिन्नप्रतियोगितासंबंधेनान्वयइति स्तइतिद्विवचनं
प्रयोगसाधुतामात्रंदाराःसंतीतिवत् भूतलवृत्त्यभावस्यघटपटोभयत्वावच्छिन्नप्रतियोगितासंबंधेनघटपटयो
रन्वयः तथाच भूतलवृत्त्यभावीयौघटपटौस्तइत्यन्वयइतिकेचिन्न ध्येयत्वस्यसमभ्यर्थस्याभावोघटपटोभयत्व भूतला
सामानाधिकरण्येनइत्यपिकेचित् तस्यआरोपेनसमत्वाद्द्व्यत्वगुणत्वेन स्तइत्यन्वगत्यभावः घटपटौनस्तइत्या
दौनघटत्वंपटत्वंउभयत्वंचपरस्परसामानाधिकरण्यायन्नंप्रतियोगितावच्छेदकंनतूभयत्वमात्रंकेवलंघटत्वं
पटत्वंवायात्किंचिदुभय ॒ नतादृशप्रत्ययः एवंद्वौपुरुषौनास्तीत्यादावपिविशेषणाविशेष्यभावापन्नंपुरुषत्वं
द्वौद्वित्वप्रतियोगितावच्छेदकइत्यादिकमूह्यंमू

२ शतिकेवलघटत्वानिकेवलपटत्वानियाघटपटौनस्तइत्यभिप्रत्ययात् तादृशप्रतियोगितावच्छेदक
२ वच्छिन्नंघटपटोभयमेवास्तउभयवत्येव २

विं॰ना॰ शि॰ भ॰

५

लक्षणयोः पौनरुक्त्यापत्तिशंकयाह साध्यमिति असमानाधिकरण्यं तदनधिकरणाधिकरणत्वं तदधिकरणानधिकरणत्व।
आधेयत्वावच्छिन्नद्रव्यत्वादित्यादौ अव्याप्तिः समवायेन द्रव्यत्वानधिकरणाधिकरणत्वस्य सत्वात् अत आह यदधिकरणेति सा
ध्यमसमानाधिकरणं यस्येत्यत्र समानाधिकरणपि तस्य साध्यस्य यत्पदार्थसंबंधोल्लेखेन तत्प्रबोधितमविवक्षितं चेत्यतो
यं

नापीति साध्यसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्वं साध्यनिष्ठासामानाधिकरण्य
प्रतियोगित्वम् नापि साध्यासामानाधिकरण्यानधिकरणत्वम्

यदितीति किंचित् अत्रापि यत्तत्पदयोरननुयोगमादाह साध्यनिष्ठेति साध्यनिष्ठाभावप्रतियोगवृत्तित्वनिरूप
काधिकरणताप्रतियोगित्वम् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितानिरूपकतासंबंधेनावच्छेदकं यदधिकरणं
तद्वृत्तित्वमितियावत् द्रव्यं सत्वादित्यत्र द्रव्यत्वे साध्ये गुणवृत्तित्वाभावस्य सत्वात् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रति
योगितायां निरूपकतासंबंधेनावच्छेदके गुणस्य वृत्तित्वस्य समवायां सत्वान्नातिव्याप्तिः १ ॥ ॥ ॥ १५

ननुवह्निमान्धूमादित्यादौ अयोगोलकीयवह्नौ पर्वतीयवह्नौ महानसवृत्तित्वाभावस्यसत्त्वात्तादृशसाध्यनिष्ठाभावप्रति
योगिवृत्तित्वनिरूपकंअधिकरणंमहानसंतद्वृत्तित्वस्यधूमेसत्त्वादव्याप्तिः किंच साध्यनिष्ठसामानाधिकरण्यं
इत्यत्रवृत्तित्वंसाध्यतावच्छेदकसंबंधेनबोध्यं अन्यथास्वरूपवृत्त्यात्ममहाकालान्यतरत्वादित्यादौ अव्याप्तिः
तथाचसंयोगेनद्रव्यसामान्यस्यसाध्यतायांसमवायेनहेतौद्रव्यत्वेऽव्याप्तिः तत्रसंयोगेनगुणादिवृत्ति

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमितियावत् तदनधिकरणत्वमित्यर्थः
साध्यवह्निनस्यच साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसंगः ॥

तस्याप्रसिद्धत्वात्साध्यनिष्ठसामानाधिकरण्यप्रतियोगित्वस्यगुणवादौअप्रसिद्धेरित्यतआह
साध्यनिष्ठाधेयत्वेति साध्यनिष्ठाधेयत्वंसाध्यतावच्छेदकसंबंधेनवाच्यम् तेनस्वरूपवृत्त्यात्ममहाकाला
न्यतरत्वादित्यादौसंबंधसामान्येनस्वनिष्ठाधेयत्वानिरूपकाधिकरणगगनादाववृत्तेर्नाव्याप्ति
ः समवायेनवह्निनिष्ठाधेयत्वानिरूपकाधिकरणपर्वतादिवृत्तौ धूमेनाव्याप्तिर्वा इतिमत्वमपि
हेतुतावच्छेदकसंबंधेनबोध्यं तेनसंयोगेनवह्निनिष्ठाधेयत्वानिरूपकधूमावयवसमवेतेधूमेनाव्याप्तिः ॥

सि. शि. भ. टी. नन्वेवं सत्तावान् द्रव्यत्वादित्यत्र समवायेन हेतौ द्रव्यं घटादित्यत्र संयोगेन हेतौ घटे चाव्याप्तिः समवायेन साध्यनिष्ठाधेयत्वा
निरूपकाधिकरणे सामान्ये गुणादौ न हेतुतावच्छेदकसंबंधेन समवायेन संयोगेन च तत्र प्रसिद्धेरत आह साध्यनिष्ठेति अ
६ व्यापकता हेतुतावच्छेदकसंबंधेन हेत्वधिकरणतात्वावच्छिन्नाभावत्वेन वाच्या तेन वह्न्यधिकरणतावच्छिन्नाभावस्य प्रमेय
त्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेपि न क्षतिः आर्द्रेन्धनप्रभववह्न्यधिकरणत्वाभावस्य तादृशा
धिकरणत्वव्यापकत्वादाह सामान्येति वह्न्यधिकरणतासामान्यस्याथो गोलकीयवह्न्यधिकरणतासाधारणस्य ता

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति तु निष्कर्षः
तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः साध्यवैयधिकरण्यानधिकरणत्वं वा साध्यवैयधिकरण्यं साध्यव
द्भिन्नाधिकरणत्वम् ॥ ॥

तेन२

दृशप्रतियोगित्वाभावान्नातिव्याप्तिरिति साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकसंबंधानिरूपि
तहेतुतावच्छेदकावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वकत्वमिति तु निष्कर्षः व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिता ६
कस्य वह्न्यधिकरणत्वाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेपि नातिव्याप्तिः अत्र व्यापकतायां प्रति
योगिवैयधिकरण्यं न निविष्टम् तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभावस्य केवलान्वयित्वेपि नातिव्याप्तिः

हेतुतावच्छेदकेति हेत्वधिकरणवृत्तिमत्त्वसम्बन्धावच्छेदकतायाम् हेत्वधिकरणावच्छेदेनेत्यर्थः तेनैव हेतुतावच्छेदकसंबंधेनैव
आधेयत्वव्याप्तिमाह संयोगेनेति अत्रतावृत्तित्वेनान्वयः वह्निमतीत्यत्रापिसंयोगेनेत्यनुषज्यते न योग
नत्वसमवायेनवह्नेःसाध्यतायांसंयोगेनहेतौधूमादावतिव्याप्तिवारणम् संबंधांतरेणेति नन्वाकाशादेर्वृ
त्त्यप्रसिद्धिरितिसंबंधभेदेनवर्तमानपर्यंतानुधावनंव्यर्थमितिवाच्यं आकाशादेरवृत्तित्वेनतद्वृत्तिसाध्यवद्वृत्तित्वा
भावेहेत्वधिकरणावच्छिन्नत्वासंभवात् यद्यपिपर्वतरूपादौवह्निमत्संयुक्तत्वाभावस्तत्पर्वतादिदेशावच्छिन्नत्वम् रूपादेः

केचित्तु साध्येति साध्यसामानाधिकरण्यंहेतुतावच्छेदकसंबंधेनहेत्वधिकरणेतेनैवसंबंधेनसाध्यव
द्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थः तेनधूमस्यस्वावयवेसंयोगेनवह्निमतिचसमवायेनावृत्तावपि
नक्षतिः तादृशाभावाश्चसंबंधांतरेणवर्तमानेकलक्षः

कुत्रापिसंयुक्तत्वाभावेनस्वरूपेणैवतथात्वसंभवात् गुणाकिरणावृत्त्यांसमवायमेवव्याप्यवृत्तितावच्छेदकनिरासान्न
थापिपर्वतरूपेनवह्निमत्संयुक्तत्वमितिमतीतिवलाद्विलक्षणमेवावच्छेदकत्वंपर्वतादेः स्वीकार्यमितिभावः नन्वधू
मवत्कपालेसमवेतघटस्यवह्निमत्पर्वतेसंयोगेनवृत्तित्वाद्धेत्वधिकरणकपालावच्छेदेनतद्वृत्तित्वाभावस्याव्याप्यवृ
त्तित्वाव्याप्यवृत्तितावच्छेदकास्वीकारेपिनक्षतिरितिवाच्यं एतद्रूपवान् एतद्रसादित्यादौ तद्रसाधिकरणावच्छे
देनैतद्रूपवत्समवेतत्वाभावस्यैतद्रूपवद्रसमवेतएवसंभवेनाव्याप्यवृत्तित्वासंभवादिति॥ ॥

तादृशहेतुतावच्छेदकसंबंधेनहेत्वधिकरणे तादृशाभाववत्त्वम् हेतुतावच्छेदकसंबंधेनसाध्यवद्वृत्तित्वाभाववत्त्वं ननुसा
ध्यवद्वृत्तित्ववतिव्यभिचारिणिकथंतदभावइत्यतःप्रतीतिंप्रमाणयति सत्तायामिति एवंसत्तायांद्रव्यत्ववद्वृत्तित्वा
भावेविशिष्टसत्त्वेअतिरिक्तत्वादिति यद्यपिहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वविवक्षायाआवश्यकत्वादेवा
व्याप्तिनिरासेविशिष्टस्यातिरिक्तत्वानुधावनंनिष्फलमन्यथेदंस्पर्शवद्वृत्तित्वमूर्तत्वयोभयस्मादित्यादावव्याप्त्यापत्तेः
केवलहेत्वधिकरणस्याकाशादेर्मूर्तत्वादिनिष्ठस्पर्शवद्वृत्तित्वाभावावच्छेदकत्वात्तथापिसार्वभौमेनविशिष्टनिरूपि

व्यभिचारिणस्तुव्यभिचारनिरूपकाधिकरणएवतादृशितादृशाभाववत्त्वम् सत्तायांगुणेनद्रव्यत्वसामा
नाधिकरण्यमित्यनुभवात् नैवंविशिष्टसत्त्वेऽव्याप्तिःविशिष्टस्यातिरिक्तत्वात् अनतिरेके तु विशेष
णविशेष्यसंबंधस्यैवपरंपरयाव्याप्यत्वात् केवलान्वयिनिनाव्याप्तेरभिधानंतुद्वितीयलक्षणाभिप्रायेणेत्याहुः

ताधिकरणतायाआतिरिक्तायाअनभ्युपगमेनगुणादेरपिविशिष्टसत्ताधिकरणत्वं इत्यभिप्रायेणाविशिष्टस्याति
रिक्ताभ्युपगमेनैवसर्वसामञ्जस्यमितिकुतस्तथाविवक्षणीयमित्यभिप्रायेणवातथाभिधानात् नचोक्तभूतत्वमूर्त
त्वोभयाव्याप्तिः उभयत्वस्याप्येकविशिष्टापरत्वस्वरूपत्वेनाकाशादिवृत्तिभूतत्वमूर्तत्वादेरुभयान्यत्वादिति
विशिष्टस्यातिरिक्तत्वंसार्वभौममभिमतंस्तूपन्यस्तम् ननुप्रकारान्तरेणाव्याप्तिनिरासएवनभवतीतितथोक्त
मितिकश्चित् द्वितीयलक्षणेऽपि वैयधिकरण्यपदार्थमध्ये साध्यवन्नेदस्यघटकत्वात्तदप्रसिद्धेर्वाव्याप्तिरितिभावः॥